श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री षोडशायुधस्तोत्रम् ॥

*This document** *has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री षोडशायुधस्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

स्वसङ्कल्पकलाकल्पैरायुधैरायुधेश्वरः।
जुष्टः षोडशभिर्दिव्यैर्जुषतां वः परः पुमान्॥ १ ॥

यदायत्तं जगच्चक्रं कालचक्रं च शाश्वतम्।
पातु वस्तत् परं चक्रं चक्ररूपस्य चक्रिणः॥ २ ॥

यत्प्रसूतिशतैरासन् रुद्राः परशुलाञ्छनाः।
स दिव्यो हेतिराजस्य परशुः परिपातु वः॥ ३ ॥

हेलया हेतिराजेन यस्मिन् दैत्याः समुद्धृते।
शकुन्ता इव धावन्ति स कुन्तः पालयेत वः॥ ४ ॥

दैत्यदानवमुख्यानां दण्ड्यानां येन दण्डनम्।
हेतिदण्डेशदण्डोऽसौ भवतां दण्डयेद्द्विषः॥ ५ ॥

अनन्यान्वयभक्तानां रुन्धन्नाशामतङ्गजान्।
अनङ्कुशविहारो वः पातु हेतीश्वराङ्कुशः॥ ६ ॥

सम्भूय शलभायन्ते यत्र पापानि देहिनाम्।
स पातु शतवक्त्राग्निहेतिर्हेतीश्वरस्य वः॥ ७ ॥

अविद्यां स्वप्रकाशेन विद्यारूपश्छिनत्ति यः।
स सुदर्शननिस्त्रिंशस्सौतु वस्तत्त्वदर्शनम्॥ ८ ॥

क्रियाशक्तिगुणोविष्णोर्यो भवत्यतिशक्तिमान्।
अकुण्ठशक्तिः सा शक्तिरशक्तिं वारयेत वः॥ ९ ॥

www.prapatti.com

तारत्वं यस्य संस्थाने शब्दे च परिदृश्यते।
प्रभोः प्रहरणेन्द्रस्य पाञ्चजन्यः स पातु वः॥ १०॥

यं सात्त्विकमहङ्कारं आमनन्त्यक्षसायकम्।
अव्याद्वश्चक्ररूपस्य तद्धनुः शार्ङ्गधन्वनः॥ ११॥

आयुधेन्द्रेण येनैव विश्वसर्गो विरच्यते।
स वः सौदर्शनः कुर्यात् पाशः पाशविमोचनम्॥ १२॥

विहारो येन देवस्य विश्वक्षेत्रकृषीवलः।
व्यज्यते तेन सीरेण नासीरविजयोऽस्तु वः॥ १३॥

आयुधानामहं वज्रं इत्यगीयत यः स वः।
अव्याद्धेतीशवज्रोऽसौ अदधीच्यस्थिसम्भवः॥ १४॥

विश्वसंहृतिशक्तिर्या विश्रुता बुद्धिरूपिणी।
सा वः सौदर्शनी भूयात् गदप्रशमनी गदा॥ १५॥

यात्यतिक्षोदशालित्वं मुसलो येन तेन वः।
हेतीशमुसलेनाशु भिद्यतां मोहमौसलम्॥ १६॥

शूलिदृष्टमनोर्वाच्यो येन शूलयति द्विषः।
भवतां तेन भवतात् त्रिशूलेन विशूलता॥ १७॥

अस्त्रग्रामस्य कृत्स्नस्य प्रसूतिं यं प्रचक्षते।
सोऽव्यात् सुदर्शनो विश्वं आयुधैः षोडशायुधः॥ १८॥

श्रीमद्वेङ्कटनाथेन श्रेयसे भूयसे सताम्।
कृतेयमायुधेन्द्रस्य षोडशायुधसंस्तुतिः॥ १९॥

॥ इति श्री षोडशायुधस्तोत्रं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com